॥ श्रीः ॥

॥ अधुना 'राष्ट्रिय'वार्ताः श्रूयन्ताम् ॥

विद्वान् श्रीरमणशर्मा

काञ्चीशङ्करमठः, नॆरूर् अग्रहारः

करूर्, द्रविडदेशः (तमिऴ्नाडु)

॥ 'राष्ट्रिय'शब्दस्य व्युत्पत्तिः ॥

संस्कृतभाषायां 'राष्ट्रिय' इति शब्दो वर्तते इति सर्वे जानन्ति एव । 'राष्ट्रिय'संस्कृतसंस्थानं बहुधा संस्कृतं प्रचारयत् प्रसिद्धं वर्तते । 'राष्ट्रिय'स्वयंसेवकसङ्घोऽपि बहूनां परिचितो भवति देशसेवां कुर्वन् । अपि च एतादृशेभ्यः संस्थानामभ्यः अन्यत्रापि सामान्यव्यवहारे वयं सहजतया राष्ट्रियशब्दम् उपयुञ्ज्महे – 'राष्ट्रिय'वार्ता, 'राष्ट्रिय'स्तरः, 'राष्ट्रिय'परिस्थितिः, 'राष्ट्रिय'पक्षः इत्यादौ । अत्र सर्वत्र राष्ट्रसम्बद्धम् इत्यर्थे एव राष्ट्रिय इति शब्दः प्रयुज्यते इति स्पष्टं संस्कृतज्ञानाम् ।

अस्य च व्युत्पत्तिः एवं भवति । "राष्ट्रावारपाराद् घखौ" (४-२-९३) "तस्येदम्" (४-३-१२०) इति पाणिनीयाभ्यां सूत्राभ्यां सम्बन्धसामान्यार्थे षष्ठ्यन्ताद् राष्ट्रशब्दाद् घ इति प्रत्ययः विधीयते । तत्र घ् इत्यस्य स्थाने इय् इत्यादेशो भवति (७-१-२) । ततः राष्ट्र ङस् इय इति स्थिते प्रातिपदिकसंज्ञा (१-२-४५) षष्ठ्याः लोपः (२-४-७१) राष्ट्रशब्दान्ते स्थितस्य अकारस्य लोपः (६-४-१४८) इति कृत्वा राष्ट्रिय इति रूपं सिध्यति ।

॥ अस्मिन्नर्थे 'राष्ट्रीय'शब्दः संस्कृते नास्ति ॥

अस्मिन्नेवार्थे लोकभाषायां राष्ट्रीय इति दीर्घयुक्तः शब्दः श्रूयते इति कृत्वा केचिद् भ्रान्त्या संस्कृतेऽपि तथैव प्रयुञ्जते । यदि राष्ट्रशब्दात् छ इति प्रत्ययो लभ्येत तदा तद् रूपं सिध्येत् । परन्तु तस्येदम् इति सम्बन्धसामान्यार्थे राष्ट्रशब्दाद् घप्रत्यय एव विहित इत्यतः अस्मिन्नर्थे संस्कृतभाषायां रूपान्तरं दुरुपपादमेव ।

॥ 'राष्ट्रीय'शब्दः साधुरेव इत्यत्र एकेषां प्रयत्नः ॥

अस्मिन् विषये "राष्ट्रीयशब्दस्य पाणिनीयता निर्बाधा" इति शीर्षकयुतं लेखनं प्रकाशितं संस्कृतसम्बन्धिनि पत्रिकान्तरे । तत्र च एवं निरूपितं वर्तते –

"राष्ट्रावारपाराद् घखौ" (४-२-९३) इति सूत्रेण विहितः घप्रत्ययः "शेषे" (४-२-९२) इत्यारभ्य "तस्य विकारः" (४-३-१३४) इत्यतः प्राग् यावन्तोऽर्थाः कीर्तिताः तेष्वेव प्रत्ययान्तरं बाधित्वा प्रवर्तते । तदुत्तरं तु ये अर्थाः, तेषु अन्येषां प्रत्ययानां प्राप्तिः नैव वारयितुं शक्यते । प्रकृते च "प्राक् क्रीताच्छः" (५-१-१) इति छप्रत्ययाधिकारे "तस्मै हितम्" (५-१-५) "तदस्य तदस्मिन् स्यादिति" (५-१-१६) इति सूत्राभ्यां सर्वेभ्यः प्रातिपदिकेभ्यः उत्सर्गतः छप्रत्ययो विधीयते । स यदा राष्ट्रशब्दाद् भवति तदा राष्ट्रीय इति रूपं सिध्यति । बहुत्र प्राचीनग्रन्थेषु राष्ट्रीयशब्दस्य प्रयोगो वर्तते । अतः राष्ट्रीयशब्दः साधुः पाणिनीयश्च – इति ।

॥ 'राष्ट्रीय'शब्दस्य राष्ट्रसम्बन्धि इत्यर्थे न साधुत्वम् ॥

अत्रेदं वक्तव्यम् । राष्ट्रीयशब्दः सर्वथा असाधुः इति केनापि नोच्यते । परन्तु अस्मिन्नर्थे अयं शब्दः साधुः इति व्यवस्था वर्तते । यथा हि गच्छन्ति इति बहुत्वे साधुः, न तु एकत्वे । तद्वद् राष्ट्रीय इति शब्दः हितार्थे स्यादेव, तेन च राष्ट्रस्य हितं कुर्वन् सङ्घः यदि "राष्ट्रीयस्वयंसेवकसङ्घः" इति विवक्ष्यते तदा न कापि विप्रतिपत्तिः । यद् वा "राष्ट्रम् अस्यां भूमौ स्याद्" इति विवक्षा यदि शिष्टप्रयोगारूढा तदा "राष्ट्रीया भूमिः' इत्यपि भवति । परन्तु 'राष्ट्रिय'वार्ता इत्यादौ हिताद्यर्थभानं नास्ति, प्रत्युत राष्ट्रसम्बद्धम् इत्येतावन्मात्रस्य अर्थस्य भानम् अस्ति । क्वचित् स्वयंसेवकसङ्घादौ वस्तुतः हितत्वे सति दीर्घयुक्तस्य रूपस्य उपपत्तावपि सर्वत्र तादृशः अर्थः नैव उत्प्रेक्षितुं शक्यते । किं दूरदर्शने प्रकाशिताः वार्ताः सर्वाः राष्ट्राय हिताः भवन्तीति प्रतिज्ञातुं शक्यते ?! अतः ताः राष्ट्रियवार्ताः एव, न तु राष्ट्रीयवार्ताः । राष्ट्रियस्तरः राष्ट्रियपरिस्थितिः इत्यादौ तु हितत्वं दुरुपपादतरम् ।

अतः राष्ट्रसम्बद्धम् इत्येतावन्मात्रविवक्षा यदा भवति, तदा "तस्येदम्" (४-३-१२०) इति सूत्रेणैव प्रत्ययः सम्पादनीयः, तच्च सूत्रं शैषिकप्रकरणे एव वर्तते, तस्मिंश्च प्रकरणे राष्ट्रशब्दाद् घप्रत्यय एव भवति इत्यतः राष्ट्रसम्बद्धम् इति सम्बन्धसामान्यार्थे राष्ट्रियशब्द एव लभ्यते संस्कृतभाषायाम्, न तु राष्ट्रीयशब्दः ॥

॥ महाराष्ट्रादिविषयः ॥

इदं त्विह वक्तव्यम् । "येन विधिस्तदन्तस्य" (१-१-७२) इत्यस्य सूत्रस्य "समासप्रत्ययविधौ प्रतिषेधः" इति वार्तिकं वर्तते इत्यतः राष्ट्रशब्दात् केवलादेव अयं घप्रत्ययः । यत्र तु राष्ट्रशब्दः समासान्ते श्रूयते तत्र "तस्येदम्" (४-३-१२०) इत्यर्थे द्वेधा गतिः ।

यदि स शब्दः कस्यचिद् लौकिकी संज्ञा भवति यथा महाराष्ट्र इति, तदा "वृद्धिर्यस्याचाम्" (१-१-७३) इत्यस्य सूत्रस्य "वा नामधेयस्य" इति वार्तिकेन वृद्धसंज्ञां विकल्पेन सम्पाद्य "वृद्धाच्छः" (४-२-११४) इति छप्रत्यये कृते 'महाराष्ट्रीय' इति रूपम् । यदा तु वृद्धसंज्ञा विकल्पेन नास्ति तदा तस्मिन्नेवार्थे "प्राग् दीव्यतोऽण्"

(४-१-८३) इति परमोत्सर्गभूते अण्प्रत्यये कृते 'माहाराष्ट्रः' इति रूपम् । यदा वा संज्ञात्वमेव नास्ति तदा सुतराम् अणेव । ततश्च स्वराष्ट्रसम्बन्धि इत्यर्थे 'स्वाराष्ट्रः' इति रूपम् ।

एवं सति द्वयोः राष्ट्रयोः अन्तः मध्ये विद्यमानम् इत्याद्यर्थे अन्तर् राष्ट्र इति शब्दयोः समासेन अन्ताराष्ट्र इति शब्दे सिद्धे तस्माद् तस्येदम् इत्यर्थे अणेव लभ्यते, न तु छः, नतरां घः । अतः आन्ताराष्ट्रम् इत्येव वक्तव्यं प्राप्नोति । अन्ताराष्ट्रीय इति यदि प्रामाणिकः प्राचीनः प्रयोगो लभ्येत तदा "गहादिभ्यश्च" (४-२-१३८) इति सूत्रेण गहादेः आकृतिगणत्वाच्च तस्य साधुत्वं वक्तव्यम् ।

अत्र कश्चन प्रश्नः – ननु राष्ट्रिय इति प्रथमं रूपं कृत्वा ततः अन्तश्शब्देन समासे को दोषः – इति । उच्यते । तदा द्वयोः राष्ट्रिययोः मध्ये विद्यमानमेव अन्ताराष्ट्रियम् इति स्यात्, न तु द्वयो राष्ट्रयोः । तौ च राष्ट्रियौ राष्ट्रभेदे प्रमाणाभावात् स्वरसतः एकराष्ट्रसम्बन्धिनौ एव लभ्येते । अतः अनया रीत्या व्याख्याते इष्टार्थलाभो न भवति । तस्माद् 'आन्ताराष्ट्र' इति, प्राचीनप्रयोगलाभे 'अन्ताराष्ट्रीय' इति वा एव रूपं व्याकरणसम्मतं भाति ॥

॥ उपसंहारः ॥

एवं च राष्ट्रसम्बन्धि इत्यर्थे केवलस्य राष्ट्रशब्दस्य राष्ट्रिय इत्येव रूपम् । राष्ट्रीय इति तु राष्ट्राय हितः इत्याद्यर्थे एव स्यात् । राष्ट्रान्तानां शब्दानां तु सम्बन्धसामान्यार्थे विषये द्वेधा गतिः । संज्ञात्वे सति महाराष्ट्रीय इति माहाराष्ट्र इति च विकल्पेन द्वे रूपे भवतः । संज्ञात्वाभावे तु ईयान्तत्वेन प्रामाणिके प्राचीनप्रयोगे लब्धे अन्ताराष्ट्रीय इत्यादीनि भवन्ति । तदभावे तु आन्ताराष्ट्र इत्यादीन्येव साधूनि ।

कुत्र कः प्रत्ययः कर्तव्यः इत्यत्र क्लेशम् अनुभवन्तः तद्धितप्रयत्नं विहाय षष्ठीसमासेनैव राष्ट्रस्तरः राष्ट्रपरिस्थितिः महाराष्ट्रजनः अन्ताराष्ट्रगोष्ठी इत्येवं शब्दान् प्रयोक्तुम् अर्हन्ति ॥

-*-*-*-